# Bhramaragita from Shrimadbhagavatam

# શ્રીમદ્ભાગવતાન્તર્ગતમ્ ભ્રમરગીતમ્

## Document Information

Text title : shrimadbhAgavatAntargataM bhramaragIta

File name : bhramaragIta.itx

Category : gItam, giitaa, vyAsa

Location : doc_giitaa

Author : maharShi vyAsa

Description-comments : Bhagavatam skanda 10 adhyAya 47

Latest update : November 10, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીમદ્ભાગવતાન્તર્ગતમ્ ભ્રમરગીતમ્

શ્રીશુક ઉવાચ ।
તં વીક્ષ્ય કૃષાનુચરં વ્રજસ્ત્રિયઃ
પ્રલમ્બબાહું નવકઞ્જલોચનમ્ ।
પીતામ્બરં પુષ્કરમાલિનં લસન્
મુખારવિન્દં પરિમૃષ્ટકુણ્ડલમ્ ॥ ૧૦.૪૭.૧॥

સુવિસ્મિતાઃ કોઽયમપીવ્યદર્શનઃ
કુતશ્ચ કસ્યાચ્યુતવેષભૂષણઃ ।
ઇતિ સ્મ સર્વાઃ પરિવવ્રુરુત્સુકાસ્
તમુત્તમઃશ્લોકપદામ્બુજાશ્રયમ્ ॥ ૧૦.૪૭.૨॥

તં પ્રશ્રયેણાવનતાઃ સુસત્કૃતં
સવ્રીડહાસેક્ષણસૂનૃતાદિભિઃ ।
રહસ્યપૃચ્છન્નુપવિષ્ટમાસને
વિજ્ઞાય સન્દેશહરં રમાપતેઃ ॥ ૧૦.૪૭.૩॥

જાનીમસ્ત્વાં યદુપતેઃ પાર્ષદં સમુપાગતમ્ ।
ભર્ત્રેહ પ્રેષિતઃ પિત્રોર્ભવાન્પ્રિયચિકીર્ષયા ॥ ૧૦.૪૭.૪॥

અન્યથા ગોવ્રજે તસ્ય સ્મરણીયં ન ચક્ષ્મહે ।
સ્નેહાનુબન્ધો બન્ધૂનાં મુનેરપિ સુદુસ્ત્યજઃ ॥ ૧૦.૪૭.૫॥

અન્યેષ્વર્થકૃતા મૈત્રી યાવદર્થવિડમ્બનમ્ ।
પુમ્ભિઃ સ્ત્રીષુ કૃતા યદ્વત્સુમનઃસ્વિવ ષટ્પદૈઃ ॥ ૧૦.૪૭.૬॥

નિઃસ્વં ત્યજન્તિ ગણિકા અકલ્પં નૃપતિં પ્રજાઃ ।
અધીતવિદ્યા આચાર્યમૃત્વિજો દત્તદક્ષિણમ્ ॥ ૧૦.૪૭.૭॥

ખગા વીતફલં વૃક્ષં ભુક્ત્વા ચાતિથયો ગૃહમ્ ।
દગ્ધં મૃગાસ્તથારણ્યં જારા ભુક્ત્વા રતાં સ્ત્રિયમ્ ॥ ૧૦.૪૭.૮॥

ઇતિ ગોપ્યો હિ ગોવિન્દે ગતવાક્કાયમાનસાઃ ।
કૃષ્ણદૂતે સમાયાતે ઉદ્ધવે ત્યક્તલૌકિકાઃ ॥ ૧૦.૪૭.૯॥

ગાયન્ત્યઃ પ્રીયકર્માણિ રુદન્ત્યશ્ચ ગતહ્રિયઃ ।
તસ્ય સંસ્મૃત્ય સંસ્મૃત્ય યાનિ કૈશોરબાલ્યયોઃ ॥ ૧૦.૪૭.૧૦॥

કાચિન્મધુકરં દૃષ્ટ્વા ધ્યાયન્તી કૃષ્ણસઙ્ગમમ્ ।
પ્રિયપ્રસ્થાપિતં દૂતં કલ્પયિત્વેદમબ્રવીત્ ॥ ૧૦.૪૭.૧૧॥

---

ગોપ્યુવાચ ।
મધુપ કિતવબન્ધો મા સ્પૃશઙ્ઘ્રિં સપત્ન્યાઃ
કુચવિલુલિતમાલાકુઙ્કુમશ્મશ્રુભિર્નઃ ।
વહતુ મધુપતિસ્તન્માનિનીનાં પ્રસાદં
યદુસદસિ વિડમ્બ્યં યસ્ય દૂતસ્ત્વમીદૃક્ ॥ ૧૦.૪૭.૧૨॥

સકૃદધરસુધાં સ્વાં મોહિનીં પાયયિત્વા
સુમનસ ઇવ સદ્યસ્તત્યજેઽસ્માન્ભવાદૃક્ ।
પરિચરતિ કથં તત્પાદપદ્મં નુ પદ્મા
હ્યપિ બત હૃતચેતા હ્યુત્તમઃશ્લોકજલ્પૈઃ ॥ ૧૦.૪૭.૧૩॥

કિમિહ બહુ ષડઙ્ઘ્રે ગાયસિ ત્વં યદૂનાં
અધિપતિમગૃહાણામગ્રતો નઃ પુરાણમ્ ।
વિજયસખસખીનાં ગીયતાં તત્પ્રસઙ્ગઃ
ક્ષપિતકુચરુજસ્તે કલ્પયન્તીષ્ટમિષ્ટાઃ ॥ ૧૦.૪૭.૧૪॥

દિવિ ભુવિ ચ રસાયાં કાઃ સ્ત્રિયસ્તદ્દુરાપાઃ
કપટરુચિરહાસભ્રૂવિજૃમ્ભસ્ય યાઃ સ્યુઃ ।
ચરણરજ ઉપાસ્તે યસ્ય ભૂતિર્વયં કા
અપિ ચ કૃપણપક્ષે હ્યુત્તમઃશ્લોકશબ્દઃ ॥ ૧૦.૪૭.૧૫॥

વિસૃજ શિરસિ પાદં વેદ્મ્યહં ચાતુકારૈર્
અનુનયવિદુષસ્તેઽભ્યેત્ય દૌત્યૈર્મુકુન્દાત્ ।
સ્વકૃત ઇહ વિષૃષ્ટાપત્યપત્યન્યલોકા
વ્યસૃજદકૃતચેતાઃ કિં નુ સન્ધેયમસ્મિન્ ॥ ૧૦.૪૭.૧૬॥

મૃગયુરિવ કપીન્દ્રં વિવ્યધે લુબ્ધધર્મા

સ્ત્રિયમકૃત વિરૂપાં સ્ત્રીજિતઃ કામયાનામ્ ।
બલિમપિ બલિમત્ત્વાવેષ્ટયદ્ધ્વાઙ્ક્ષવદ્યસ્
તદલમસિતસખ્યૈર્દુસ્ત્યજસ્તત્કથાર્થઃ ॥ ૧૦.૪૭.૧૭॥

યદનુચરિતલીલાકર્ણપીયૂષવિપ્રુટ્
સકૃદદનવિધૂતદ્વન્દ્વધર્મા વિનષ્ટાઃ ।
સપદિ ગૃહકુટુમ્બં દીનમુત્સૃજ્ય દીના
બહવ ઇહ વિહઙ્ગા ભિક્ષુચર્યાં ચરન્તિ ॥ ૧૦.૪૭.૧૮॥

વયમૃતમિવ જિહ્મવ્યાહૃતં શ્રદ્દધાનાઃ
કુલિકરુતમિવાજ્ઞાઃ કૃષ્ણવધ્વો હરિણ્યઃ ।
દદૃશુરસકૃદેતત્તન્નખસ્પર્શતીવ્ર
સ્મરરુજ ઉપમન્ત્રિન્ભણ્યતામન્યવાર્તા ॥ ૧૦.૪૭.૧૯॥

પ્રિયસખ પુનરાગાઃ પ્રેયસા પ્રેષિતઃ કિં
વરય કિમનુરુન્ધે માનનીયોઽસિ મેઽઙ્ગ ।
નયસિ કથમિહાસ્માન્દુસ્ત્યજદ્વન્દ્વપાર્શ્વં
સતતમુરસિ સૌમ્ય શ્રીર્વધૂઃ સાકમાસ્તે ॥ ૧૦.૪૭.૨૦॥

અપિ બત મધુપુર્યામાર્યપુત્રોઽધુનાસ્તે
સ્મરતિ સ પિતૃગેહાન્સૌમ્ય બન્ધૂંશ્ચ ગોપાન્ ।
ક્વચિદપિ સ કથા નઃ કિઙ્કરીણાં ગૃણીતે
ભુજમગુરુસુગન્ધં મૂર્ધ્ન્યધાસ્યત્કદા નુ ॥ ૧૦.૪૭.૨૧॥

---

શ્રીશુક ઉવાચ ।
અથોદ્ધવો નિશમ્યૈવં કૃષ્ણદર્શનલાલસાઃ ।
સાન્ત્વયન્પ્રિયસન્દેશૈર્ગોપીરિદમભાષત ॥ ૧૦.૪૭.૨૨॥

શ્રીઉદ્ધવ ઉવાચ ।
અહો યૂયં સ્મ પૂર્ણાર્થા ભવત્યો લોકપૂજિતાઃ ।
વાસુદેવે ભગવતિ યાસામિત્યર્પિતં મનઃ ॥ ૧૦.૪૭.૨૩॥

દાનવ્રતતપોહોમ જપસ્વાધ્યાયસંયમૈઃ ।
શ્રેયોભિર્વિવિધૈશ્ચાન્યૈઃ કૃષ્ણે ભક્તિર્હિ સાધ્યતે ॥ ૧૦.૪૭.૨૪॥

ભગવત્યુત્તમઃશ્લોકે ભવતીભિરનુત્તમા ।

ભક્તિઃ પ્રવર્તિતા દિષ્ટ્યા મુનીનામપિ દુર્લભા ॥ ૧૦.૪૭.૨૫॥

દિષ્ટ્યા પુત્રાન્પતીન્દેહાન્સ્વજનાન્ભવનાનિ ચ ।
હિત્વાવૃનીત યૂયં યત્કૃષ્ણાખ્યં પુરુષં પરમ્ ॥ ૧૦.૪૭.૨૬॥

સર્વાત્મભાવોઽધિકૃતો ભવતીનામધોક્ષજે ।
વિરહેણ મહાભાગા મહાન્મેઽનુગ્રહઃ કૃતઃ ॥ ૧૦.૪૭.૨૭॥

શ્રૂયતાં પ્રિયસન્દેશો ભવતીનાં સુખાવહઃ ।
યમાદાયાગતો ભદ્રા અહં ભર્તૂ રહસ્કરઃ ॥ ૧૦.૪૭.૨૮॥

શ્રીભગવાનુવાચ ।
ભવતીનાં વિયોગો મે ન હિ સર્વાત્મના ક્વચિત્ ।
યથા ભૂતાનિ ભૂતેષુ ખં વાય્વગ્નિર્જલં મહી ।
તથાહં ચ મનઃપ્રાણ ભૂતેન્દ્રિયગુણાશ્રયઃ ॥ ૧૦.૪૭.૨૯॥

આત્મન્યેવાત્મનાત્માનં સૃજે હન્મ્યનુપાલયે ।
આત્મમાયાનુભાવેન ભૂતેન્દ્રિયગુણાત્મના ॥ ૧૦.૪૭.૩૦॥

આત્મા જ્ઞાનમયઃ શુદ્ધો વ્યતિરિક્તોઽગુણાન્વયઃ ।
સુષુપ્તિસ્વપ્નજાગ્રદ્ભિર્માયાવૃત્તિભિરીયતે ॥ ૧૦.૪૭.૩૧॥

યેનેન્દ્રિયાર્થાન્ધ્યાયેત મૃષા સ્વપ્નવદુત્થિતઃ ।
તન્નિરુન્ધ્યાદિન્દ્રિયાણિ વિનિદ્રઃ પ્રત્યપદ્યત ॥ ૧૦.૪૭.૩૨॥

એતદન્તઃ સમામ્નાયો યોગઃ સાઙ્ખ્યં મનીષિણામ્ ।
ત્યાગસ્તપો દમઃ સત્યં સમુદ્રાન્તા ઇવાપગાઃ ॥ ૧૦.૪૭.૩૩॥

યત્ત્વહં ભવતીનાં વૈ દૂરે વર્તે પ્રિયો દૃશામ્ ।
મનસઃ સન્નિકર્ષાર્થં મદનુધ્યાનકામ્યયા ॥ ૧૦.૪૭.૩૪॥

યથા દૂરચરે પ્રેષ્ઠે મન આવિશ્ય વર્તતે ।
સ્ત્રીણાં ચ ન તથા ચેતઃ સન્નિકૃષ્ટેઽક્ષિગોચરે ॥ ૧૦.૪૭.૩૫॥

મય્યાવેશ્ય મનઃ કૃત્સ્નં વિમુક્તાશેષવૃત્તિ યત્ ।
અનુસ્મરન્ત્યો માં નિત્યમચિરાન્મામુપૈષ્યથ ॥ ૧૦.૪૭.૩૬॥

યા મયા ક્રીડતા રાત્ર્યાં વનેઽસ્મિન્વ્રજ આસ્થિતાઃ ।
અલબ્ધરાસાઃ કલ્યાણ્યો માપુર્મદ્વીર્યચિન્તયા ॥ ૧૦.૪૭.૩૭॥

શ્રીશુક ઉવાચ ।

એવં પ્રિયતમાદિષ્ટમાકર્ણ્ય વ્રજયોષિતઃ ।
તા ઊચુરુદ્ધવં પ્રીતાસ્તત્સન્દેશાગતસ્મૃતીઃ ॥ ૧૦.૪૭.૩૮॥

ગોપ્ય ઊચુઃ ।
દિષ્ટ્યાહિતો હતઃ કંસો યદૂનાં સાનુગોઽઘકૃત્ ।
દિષ્ટ્યાપ્તૈર્લબ્ધસર્વાર્થૈઃ કુશલ્યાસ્તેઽચ્યુતોઽધુના ॥ ૧૦.૪૭.૩૯॥

કચ્ચિદ્ગદાગ્રજઃ સૌમ્ય કરોતિ પુરયોષિતામ્ ।
પ્રીતિં નઃ સ્નિગ્ધસવ્રીડ હાસોદારેક્ષણાર્ચિતઃ ॥ ૧૦.૪૭.૪૦॥

કથં રતિવિશેષજ્ઞઃ પ્રિયશ્ચ પુરયોષિતામ્ ।
નાનુબધ્યેત તદ્વાક્યૈર્વિભ્રમૈશ્ચાનુભાજિતઃ ॥ ૧૦.૪૭.૪૧॥

અપિ સ્મરતિ નઃ સાધો ગોવિન્દઃ પ્રસ્તુતે ક્વચિત્ ।
ગોષ્ઠિમધ્યે પુરસ્ત્રીણામ્ગ્રામ્યાઃ સ્વૈરકથાન્તરે ॥ ૧૦.૪૭.૪૨॥

તાઃ કિં નિશાઃ સ્મરતિ યાસુ તદા પ્રિયાભિર્
વૃન્દાવને કુમુદકુન્દશશાઙ્કરમ્યે ।
રેમે ક્વણચ્ચરણનૂપુરરાસગોષ્ઠ્યામ્
અસ્માભિરીડિતમનોજ્ઞકથઃ કદાચિત્ ॥ ૧૦.૪૭.૪૩॥

અપ્યેષ્યતીહ દાશાર્હસ્તપ્તાઃ સ્વકૃતયા શુચા ।
સઞ્જીવયન્નુ નો ગાત્રૈર્યથેન્દ્રો વનમમ્બુદૈઃ ॥ ૧૦.૪૭.૪૪॥

કસ્માત્કૃષ્ણ ઇહાયાતિ પ્રાપ્તરાજ્યો હતાહિતઃ ।
નરેન્દ્રકન્યા ઉદ્વાહ્ય પ્રીતઃ સર્વસુહૃદ્વૃતઃ ॥ ૧૦.૪૭.૪૫॥

કિમસ્માભિર્વનૌકોભિરન્યાભિર્વા મહાત્મનઃ ।
શ્રીપતેરાપ્તકામસ્ય ક્રિયેતાર્થઃ કૃતાત્મનઃ ॥ ૧૦.૪૭.૪૬॥

પરં સૌખ્યં હિ નૈરાશ્યં સ્વૈરિણ્યપ્યાહ પિઙ્ગલા ।
તજ્જાનતીનાં નઃ કૃષ્ણે તથાપ્યાશા દુરત્યયા ॥ ૧૦.૪૭.૪૭॥

ક ઉત્સહેત સન્ત્યક્તુમુત્તમઃશ્લોકસંવિદમ્ ।
અનિચ્છતોઽપિ યસ્ય શ્રીરઙ્ગાન્ન ચ્યવતે ક્વચિત્ ॥ ૧૦.૪૭.૪૮॥

સરિચ્છૈલવનોદ્દેશા ગાવો વેણુરવા ઇમે ।
સઙ્કર્ષણસહાયેન કૃષ્ણેનાચરિતાઃ પ્રભો ॥ ૧૦.૪૭.૪૯॥

પુનઃ પુનઃ સ્મારયન્તિ નન્દગોપસુતં બત ।

શ્રીનિકેતૈસ્તત્પદકૈર્વિસ્મર્તું નૈવ શક્નુમઃ ॥ ૧૦.૪૭.૫૦॥

ગત્યા લલિતયોદાર હાસલીલાવલોકનૈઃ ।
માધ્વ્યા ગિરા હૃતધિયઃ કથં તં વિસ્મરામ હે ॥ ૧૦.૪૭.૫૧॥

હે નાથ હે રમાનાથ વ્રજનાથાર્તિનાશન ।
મગ્નમુદ્ધર ગોવિન્દ ગોકુલં વૃજિનાર્ણવાત્ ॥ ૧૦.૪૭.૫૨॥

શ્રીશુક ઉવાચ ।
તતસ્તાઃ કૃષ્ણસન્દેશૈર્વ્યપેતવિરહજ્વરાઃ ।
ઉદ્ધવં પૂજયાં ચક્રુર્જ્ઞાત્વાત્માનમધોક્ષજમ્ ॥ ૧૦.૪૭.૫૩॥

ઉવાસ કતિચિન્માસાન્ગોપીનાં વિનુદન્શુચઃ ।
કૃષ્ણલીલાકથાં ગાયન્રમયામાસ ગોકુલમ્ ॥ ૧૦.૪૭.૫૪॥

યાવન્ત્યહાનિ નન્દસ્ય વ્રજેઽવાત્સીત્સ ઉદ્ધવઃ ।
વ્રજૌકસાં ક્ષણપ્રાયાણ્યાસન્કૃષ્ણસ્ય વાર્તયા ॥ ૧૦.૪૭.૫૫॥

સરિદ્વનગિરિદ્રોણીર્વીક્ષન્કુસુમિતાન્દ્રુમાન્ ।
કૃષ્ણં સંસ્મારયન્રેમે હરિદાસો વ્રજૌકસામ્ ॥ ૧૦.૪૭.૫૬॥

દૃષ્ટ્વૈવમાદિ ગોપીનાં કૃષ્ણાવેશાત્મવિક્લવમ્ ।
ઉદ્ધવઃ પરમપ્રીતસ્તા નમસ્યન્નિદં જગૌ ॥ ૧૦.૪૭.૫૭॥

એતાઃ પરં તનુભૃતો ભુવિ ગોપવધ્વો
ગોવિન્દ એવ નિખિલાત્મનિ રૂઢભાવાઃ ।
વાઞ્છન્તિ યદ્ભવભિયો મુનયો વયં ચ
કિં બ્રહ્મજન્મભિરનન્તકથારસસ્ય ॥ ૧૦.૪૭.૫૮॥

ક્વેમાઃ સ્ત્રિયો વનચરીર્વ્યભિચારદુષ્ટાઃ
કૃષ્ણે ક્વ ચૈષ પરમાત્મનિ રૂઢભાવઃ । ।
નન્વીશ્વરોઽનુભજતોઽવિદુષોઽપિ સાક્ષાચ્
છ્રેયસ્તનોત્યગદરાજ ઇવોપયુક્તઃ ॥ ૧૦.૪૭.૫૯॥

નાયં શ્રિયોઽઙ્ગ ઉ નિતાન્તરતેઃ પ્રસાદઃ
સ્વર્યોષિતાં નલિનગન્ધરુચાં કુતોઽન્યાઃ ।
રાસોત્સવેઽસ્ય ભુજદણ્ડગૃહીતકણ્ઠ
લબ્ધાશિષાં ય ઉદગાદ્વ્રજવલ્લભીનામ્ ॥ ૧૦.૪૭.૬૦॥

આસામહો ચરણરેણુજુષામહં સ્યાં
વૃન્દાવને કિમપિ ગુલ્મલતૌષધીનામ્ ।
યા દુસ્ત્યજં સ્વજનમાર્યપથં ચ હિત્વા
ભેજુર્મુકુન્દપદવીં શ્રુતિભિર્વિમૃગ્યામ્ ॥ ૧૦.૪૭.૬૧॥

યા વૈ શ્રિયાર્ચિતમજાદિભિરાપ્તકામૈર્
યોગેશ્વરૈરપિ યદાત્મનિ રાસગોષ્ઠ્યામ્ ।
કૃષ્ણસ્ય તદ્ભગવતઃ ચરણારવિન્દં
ન્યસ્તં સ્તનેષુ વિજહુઃ પરિરભ્ય તાપમ્ ॥ ૧૦.૪૭.૬૨॥

વન્દે નન્દવ્રજસ્ત્રીણાં પાદરેણુમભીક્ષ્ણશઃ ।
યાસાં હરિકથોદ્ગીતં પુનાતિ ભુવનત્રયમ્ ॥ ૧૦.૪૭.૬૩॥

શ્રીશુક ઉવાચ ।
અથ ગોપીરનુજ્ઞાપ્ય યશોદાં નન્દમેવ ચ ।
ગોપાનામન્ત્ર્ય દાશાર્હો યાસ્યન્નારુરુહે રથમ્ ॥ ૧૦.૪૭.૬૪॥

તં નિર્ગતં સમાસાદ્ય નાનોપાયનપાણયઃ ।
નન્દાદયોઽનુરાગેણ પ્રાવોચન્નશ્રુલોચનાઃ ॥ ૧૦.૪૭.૬૫॥

મનસો વૃત્તયો નઃ સ્યુઃ કૃષ્ણ પાદામ્બુજાશ્રયાઃ ।
વાચોઽભિધાયિનીર્નામ્નાં કાયસ્તત્પ્રહ્વણાદિષુ ॥ ૧૦.૪૭.૬૬॥

કર્મભિર્ભ્રામ્યમાણાનાં યત્ર ક્વાપીશ્વરેચ્છયા ।
મઙ્ગલાચરિતૈર્દાનૈ રતિર્નઃ કૃષ્ણ ઈશ્વરે ॥ ૧૦.૪૭.૬૭॥

એવં સભાજિતો ગોપૈઃ કૃષ્ણભક્ત્યા નરાધિપ ।
ઉદ્ધવઃ પુનરાગચ્છન્મથુરાં કૃષ્ણપાલિતામ્ ॥ ૧૦.૪૭.૬૮॥

કૃષ્ણાય પ્રણિપત્યાહ ભક્ત્યુદ્રેકં વ્રજૌકસામ્ ।
વસુદેવાય રામાય રાજ્ઞે ચોપાયનાન્યદાત્ ॥ ૧૦.૪૭.૬૯॥

॥ ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં દશમસ્કન્ધે
પૂર્વાર્ધે ઉદ્ધવપ્રતિયાને સપ્તચત્વારિંશોઽધ્યાયાન્તર્ગતં ભ્રમરગીતં
સમાપ્તમ્ ॥ ૧૦.૪૭॥

Bhagavatam skandha 10 adhyAya 47

*Bhramaragita from Shrimadbhagavatam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*